International Journal of Sanskrit Research 2015; 1(4): 139-141

International Journal of Sanskrit Research

अनन्ता

**ISSN: 2394-7519**
IJSR 2015; 1(4): 139-141
© 2015 IJSR
www.sanskritjournal.com
Received: 19-05-2015
Accepted: 23-06-2015

**डॉ० सुनील कुमार झा**
सह प्राचार्य ;संस्कृत–विभागद्धए डॉ. जगन्नाथमिश्र संस्कृत महाविद्यालय, पस्टन–नवटोली, माया–अंधराठाढी, मधुबनी, बिहार, भारत

**Correspondence Author:**
**डॉ० सुनील कुमार झा**
सह प्राचार्य ;संस्कृत–विभागद्धए डॉ. जगन्नाथमिश्र संस्कृत महाविद्यालय, पस्टन–नवटोली, माया–बंधराठाढ़ी, मधुबनी, बिहार, भारत

# संस्कृतनाटकस्योत्पत्तिस्तथा तद्भेदविचारः

## डॉ० सुनील कुमार झा

### प्रस्तावना

संस्कृतभाषा प्राचीनतमेति सर्वसिद्धा नैतद्विषये कस्यचिद् वैमत्यम्। भाषायामस्यां मानवजीवनसमुद्धरणाय तन्मोक्षावाप्तये च आवश्यकाः उपायाः तत्वजैर्महर्षिभिः सम्यक् प्रतिपादिताः सन्ति। संस्कृतभाषा देवभाषा संस्कृत नाम दैवीवाक् अन्वाख्याता महर्षिभिः इति। संस्कृतं न केवलं देवभाषा अपि तु इयं शास्त्रभाषा, जनभाषा च तथानिखिलानां लौकिकव्यवहाराणां वैज्ञानिकानां च प्रियतमा भाषा इति चानुमन्यते। भाषेयं सुरभारती ये शिक्षन्ते ते – अहिंसा–दया–सत्य– मृदुताप्रभृतिभिर्दैवीगुणः स्वकीयं जीवनम् तथा अन्येाामपि जीवितं नितरां सफलं सुखमयं च सम्पादयितुं प्रभवन्तीति नास्त्यत्र सन्देहः। अस्याश्च सुरभारत्याः क्षेत्रमतिविशालं गगनमण्डलवद् व्यापकमस्ति।

वैदिकसाहित्यादारभ्य वेदाइग–उपनिषत्– पुराणेतिहासकाव्यानि नितरामभिव्याप्य अद्यत्वे दृश्यमाणेष्वपि आधुनिककविता–कथा– नाटक – मुक्तक – निबन्धप्रभृतिषु काव्यरत्नेषु अस्यैव डिण्डिमघोषो दरीदृश्यते। वैदिकी भाषा पुरातनी। वैदिकभाषा वेदेषु एव दृश्यते। वेदात् पूर्वं किमपि वाङ्मयं जगति नैवोपलभ्यते। जर्मन्, फ्रेन्चप्रभृतयो भाषा संस्कृतापेक्षया नितरामर्वाचीनाः इति भाषाशास्त्रिणां निश्चयो वर्तते। अस्याश्च प्रादुर्भावः कदा अभूदिति वक्तुं न केनापि शक्यते। वेदाः अनादयः वेदभाषा संस्कृतम् अतःसंस्कृतभाषापि आदिरहितेति निश्चिता भवति। एवंभूतस्य महामहिममण्डितस्य, अतिविपुलस्य, अतिगभीरस्य संस्कृतस्य वैभवं नूनमेव वर्णनातीतमेव। संस्कृतसाहित्यस्य शाखाः नैकाः राजन्ते। तासु च साहित्यमित्येका शाखा। अस्याश्च साहित्यशाखायाः सन्ति बह्व्यः उपशाखाः। उपशाखासु रूपकमन्यतमा। रूप्यन्ते विविधानि वस्तूनि अनेनेति रूपकमिति रूपकशब्दस्य निर्वचनम्। आङ्ग्लभाषायां तु रूपकम् च् स्।ल इति कथ्यते। तानि च रूपकाणि दश इति अलङ्कारशास्त्रमर्मज्ञैः निरूपितमस्ति तदित्थम्–

नाटकमथप्रकरणभाणव्यायोगसमवकारडिमाः।
ईहामृगाङ्कवीथिप्रहसनमिति रूपकानि दश।।

नाटकम् प्रकरणम्, भाणः, व्यायोगः, समवकारः, डिमः, ईहामृग, अङ्कः, वीथि, प्रहसनम्। यद्यपि रूपकाणामुत्पत्तिः कदा अभूत्, कथमभूत, तेषां च प्रणेता कः इति निर्णेतुं च कठिनं कार्यम्, तथापि इदं तु अनुमातुं शक्यते यद् दृश्यकाव्यानामुदयो संस्कृतसाहित्ये प्राचीनकाले वेदकाले वा एवाजायत।

वैदिकसाहित्येषु दृश्यकाव्यानामस्तित्वं प्रमाणितं भवति। यथा ऋग्वेदे विद्यमानाः यमयमीसंवादाः सरमापणिप्रभृतयः संवादाश्च तत्समये नाटकस्यास्त्वित्वं प्रमाणयितुं समर्थाः। रामायणे च दृश्यकाव्यसत्ता स्फुटरूपेण समुपलभ्यते। तत्र तत्र प्रयुक्तैः शैलूष–नट–नर्तक– प्रभृतिशब्दैः दृश्यकाव्यानां समाजे प्रचलनमासीदिति स्पष्टं भवति। एवमेव महाभारतस्य खिलभागभूते हरिवंशे रामचरिताभिनयस्योल्लेखादपि दृश्यकाव्यसद्भावो निश्चेतुं शक्यते। महर्षिपाणिनिना सूत्राष्टाध्याय्यामपि ''पाराशर्यशिलालिभ्यां भिक्षुनटसूत्रयोः ''4–3–10 इति सूत्रे नटशब्दस्योल्लेखनदर्शनात् तदानीमपि नटानामस्तित्वमासीदिति अनुमीयते। एवमेव भरतस्य नाट्यशास्त्रम् आधारीकृत्य ''त्रिपुरसंहारम्'' एव प्रथमं नाटकमिति, तच्च भरतेन प्रणीतमिति, एतच्च नाटकं देवप्रीतये विरचितमभूदिति विज्ञायते। किन्तु नाटकमिदं सम्प्रति नोपलभ्यते। नाट्यं नाम अनुकरणप्रधानभूतं भवति, जीवनदर्शनवैभिन्याज्जनेषु विचारस्य वै भिन्नत्वाच्च पौरस्त्यपाश्चात्य– नाट्यसिद्धान्तनिर्माणे नाटककाराणां वैविध्यं दृश्यते।

''भिन्नरुचिर्हि लोकः'' इति कथनमत्र चरितार्थं भवति। पौरस्त्यनाट्यसिद्धान्तपरम्परायां वियोगान्तं न नाटकम् इति कथनं प्रसिद्धमस्ति। पाश्चात्यसन्दर्भे तु दुःखान्तलेखनपरम्परायाः प्रभावो दृश्यते। मैक्समूलर, लेवी, ओल्डेनवर्गप्रभृतिभिः पाश्चात्यविद्वद्भिर्वेषु प्रयुक्तानां सूक्तानामाधारेण भारतीय – नाट्यकलायारुत्पत्तिर्वेदकाले एव अमन्यत। (वर्जन ऑफ दि ऋग्वेद वाल्यूम 1 पृ. 173)

संस्कृतसाहित्यसिद्धान्ते काव्यं दृश्यश्रव्यभेदेन द्विधा विभज्यते (दृश्यश्रव्यत्वभेदेन पुनः काव्यं द्विधा मतम्– साहि) तत्र दृश्यकाव्यमभिनेयं भवति तदभिनेयात्मकं दृश्यकाव्यम् नटे रामादिस्वरूपारोपाद्रूपतकत्वेन व्यवह्रयत। (दृश्यं तत्राभिनेयं तद्रूपारोपातु रूपकम् – साहि, द. 6) सरसं वाक्यार्थम् अभिनयं च दर्शकानामग्रे अभिनयमाध्यमेन समुपस्थाप्यते। आङगिक–वाचिक–आहार्य – सात्विकानामभिनय–स्वरूपाणां प्रयोगकेन्द्रभूतं नाट्यमेव ररूपकत्वेनोपरूपकत्वेन च स्वीक्रियते।

मानवजीवने नाटकस्य प्रभावः वस्तुतो मानवः सामाजिकप्राणी वर्तते। सूर्योदयादारभ्य अस्तपर्यन्तं क्षेत्रेषु कठोरतरं कार्यं कुर्वन्नरो मनोविनोदनार्थं सायं वा रात्रौ वा एतादृश्यानां रूपकाणां दर्शनेन आत्मानं विनोदयति स्म। इदानीमपि केषुचित् ग्रामेषु छायानाटकानि प्रसिद्धानि जनानां मनोविनोदाय कल्प ते। ग्रामोणजनाः बालाः, युवानः, स्त्रियः, वृद्धा अपि एतेषु छायानाटकानां दर्शनेन आनन्दमनुभवन्तीति अनुभवसिद्धधमेतत्। कालक्रमेणेदानीम् एतेषां छायानाटकानां स्थाने चलनचित्रादिकम् आगत्य अस्माकं संस्कृतिं प्राचीसम्प्रदायं च निर्मूलयतीव प्रतिभाति। काव्येषु नाटकं रम्यम्, इति काचन सूक्तिः सुप्रसिद्धा वर्तते। काव्यप्रयोजनानि मम्मटेन एवं निरूपितानि–

काव्यं यशसेऽर्थकृते व्यवहारविदे शिवेतरक्षतये।
सद्यः परनिवृत्तये कान्ता सम्मिततयोपदेशयुजे।।

एतेषु प्रयोजनेषु सद्यः परनिर्वृतये इति पदं सर्वोत्कृष्टं महत्वं संरक्षति। काव्यानन्दो ब्रह्मानन्दः सहोदर इति आलङ्कारिकाणां दृढतमो राद्धान्तः। केवलं श्रव्यकाव्यपठनेन श्रवणेन वा अनुभूयमानः आनन्दः नाटकदर्शनेन सञ्जातस्य आनन्दस्यापेक्षया न्यून एव। नाटके नटानां नटीनां विचित्रवेशभाषाभूषादय अतीव रमणीयतया सामाजिकान् झटिति आनन्दयति। रूचीनां वैचित्रत्यात् केषाञ्चित् सामाजिकानां गीतश्रवणे रतिश्चेतु, केषाञ्चितु रमणीयदृश्यपरिदर्शने नितरामभिलाषो दृश्यते। अन्येषां सामाजिकानां नृत्यविलोकने भवति समुत्साहः। विभिन्नरूचीनां समेषामपि सामाजिकानां स्रीबालवृद्धा रञ्जकं नाटकमेव विषयेऽस्मिन् नास्ति मतद्वयम्।

भरतमुनिना स्वकीये नाट्र्यशास्त्रे दशविधरूपकाणि वर्णितानि। नाटकलक्षणाकारैर्धनञ्जयप्रभृतिभिरेकैकस्यापि रूपकस्य लक्षणानि साधुनिरूपितानि सन्ति।

नाटकम्– दशविधरूपकेषु नाटकस्य प्रमुखं स्थानं वर्तते। भरतमुनिना ''नाट्यं भवानुकीर्तनम्'' इति कथितम्। ''कृतानुकरणं लोके नाट्यमित्यभिधीयते'' इति वचनमपि भरतमुनेरेव। पूर्वीयनाटकसिद्धान्ते रामायणपुराणमहाभारतादिषु प्रसिद्धमितिवृत्तम् नाटके वस्तु भवति। नायकश्च चतुर्षु धीरोदात्तधीरललितधीरप्रशान्तधीरोद्धतेषु कश्चिदपि भवितुं प्रभवति। धर्मार्थकामाः नाटके पुरुषार्थाः भवितुमर्हन्ति।

कौशिकीप्रमुखाः वृत्तयो ऽप्यत्रापेक्ष्यन्ते। प्रमुखगर्भादयः पञ्चसन्धयः अत्र भवन्ति। शृङ्गारवीररसौ प्रधानरसौ भवितव्यौ। अङ्कसंख्या पञ्च समारभ्य दशपर्यन्तं भवितुमर्हति। कवेः सामर्थ्यं तु नाटकरचनेनैव प्रकटी भवति। उच्यते च ''नाटकान्तं हि साहित्यम्'' नाटकस्य सुन्दरतरमुदाहरणं विश्वप्रसिद्धम् अभिज्ञानशाकुन्तलम् इति कथने नितरां गौरवमनुभूयते। नाटकेषु उत्तमपात्राणां भाषा संस्कृतं, स्त्रीणां नीचपात्राणां च प्राकृतं प्रयुज्यते। अद्यतनप्रणीतानि नाटकानि तु सुरभारत्या एव रचितानि सन्ति।

प्रकरणम् – प्रकरणस्येतिवृत्तं मानवसमाजे अनुभवसिद्धं वर्तते। इदं च इतिवृत्तं नाटककारेण स्वयमेव रचितव्यं भवति। सन्धयोऽङ्कावृत्तयश्च नाटकमनुसरन्ति किन्तु रसेषु प्रधानरसः शृङ्गार एव, नायकश्च अमात्यब्राह्मणधार्मिकवणिक्षु अन्यतमः। उत्तमकुलोत्पन्ना नारी गणिका वा नायिका भवेत्। दासाः, विटाः श्रे शूद्रकविरचितं मृच्छकटिकं प्रकरणस्य सवोत्तममुदाहरणं भवितुं शक्नोति।

भाणः – भाणस्यापि इतिवृत्तं कल्पितमेव भवति। एषः एकपात्रप्रयुक्तो रूपकविशेषः, इदं च पात्रं विटः। अत्र शृङ्गारहास्यौ रसौ, हास्यापेक्षया शृङ्गाररस एव प्रधानः। अत्र आकाशभाषितमिति काचन प्रक्रिया उपयुज्यते। ''चतुर्भाणी'' भाणस्योदाहरणम्। पद्मप्राभूतकम्, पादताडिकम्, धूर्तविदसंवादः, उभयामिसारिका, इत्येतद् रूपकचतुष्टयं चतुर्भाणीति व्यपदिश्यते।

प्रहसनम्– इदमपि कविकल्पितम् इतिवृत्तमवलम्ब्य प्रवर्तते। मानवसमाजे विद्ययमानान् भष्टाचारान् दुराचारान् निन्दितुं जनानां जीवनं धार्मिकमार्गे प्रवर्तयितुं च प्रहसनम् उपयुज्यते। इदं सन्धिवृत्तिविषये प्रकरणं भाण चानुसरति। प्रधानरसश्च हास्यः। प्रकरणमिदं शुद्धं सङ्कीर्णमिति नाट्यशास्त्रकारेण निरूपितम्। दशरूपककारेणापि विकृतः इति प्रकारान्तरमपि कल्पितमस्ति। तत्र शुद्धे प्रभेदे ब्राह्मणाः, यतय पात्राणि भवन्ति। संकीर्णे तु नपुसकाः, धूर्तादयो भवन्ति। शङ्खधरस्य लटकमेलकम् तथा बोधायनस्य भगवदज्जुकीयमुदाहरणे भवतः।

डिमः डिमेति रूपकस्य इतिवृत्तं प्रख्यातं भवति। चतुर्ष्वङ्केषु विभक्ते ऽस्मिन् आरभटी, सात्वती च वृत्तौ अधिकतया प्रयुज्येते। नवरसेषु रौद्रः प्रधानो रसः। शृङ्गारहास्यौ निषिद्धौ वर्तेते। अत्र उत्पाताः युद्धानि, उच्चाटनादयः क्षुद्रविषयाः समुपयुज्यन्ते। वत्सराजविरचितं त्रिपुरविजयम् रूपकस्यास्य एकमुदाहरणत्वेन ग्रहीतुं शक्यते।

व्यायोगः व्यायोगेति रूपकप्रभेदस्य वस्तु प्रख्यातमेव। अत्र अभिनयत्वेन प्रयोज्यमानाः व्यापाराः केवलमेकदिवसव्यापी च भवति। अत्र च युद्धानि युद्धवीराणाम् आत्मश्लाघा च प्रमुखाः विषयाः भवन्ति। कौशिकीवृत्तिर्गर्भसन्धिविमर्शसन्धि च परित्यज्यते। रसेषु शृङ्गारहास्यौ परिवर्जितौ भवतः। भासप्रणीतो मध्यमव्यायोगो व्यायोगस्यानुत्तममुदाहरणमिति।

समवकारः– समवकारेति रूपकप्रभेदे वस्तु नितरां प्रख्यातमेव भवति। अत्र सुरासुरयोर्विवादाः, युद्धानि च वर्ण्यन्ते। प्रधानरसौ तु रौद्रवीरौ। तिस्र अङ्कसंख्या चात्र भवति। सन्धिषु विमर्शसन्धिः, वृत्तिषु च कौशिकीवृत्ति अत्र न भवतः। अस्योदाहरणं तु वत्सराजस्य समुद्रमन्थनं प्रसिद्धम् अस्ति।
वीथी – वीथ्या विषयवस्तु कविकल्पितं भवति। अत्राङ्कः एक एव भवति। पात्राणि द्वे त्रीणि वा भवन्ति। प्रधानो रसः शृङ्गार एव। अत्र सन्धिषु मुखनिर्वहणसन्धी प्रयुज्येते। आकाशभाषितं चात्र भवेत्। अस्योदाहरणं तु त्रिपुरान्तकस्य प्रेमाभिरामम् अस्ति।

अङ्कः– अङ्कप्रभेदस्य वृत्तं प्रख्यातम्, उत्पाद्यं वा भवति। नायकस्य मरणं, स्त्रीणां रोदनं च भवेत्। वृत्तिषु भारती वृत्तिः

प्रयुज्यते। सन्धिषु मुखनिर्वहणे भवतः। अत्र प्रधानरसः करुण एव।

ईहामृगः– अस्यापीतिवृत्तं प्रख्यातमुत्पाद्यं च भवतः। अत्र नायकः हरिणीमिव सुदुर्लभां नायिकामभिलषति। अत एव अस्य रूपकस्य ईहामृगः इत्यभिधानम्। कौशिकीवृत्तिर्नात्र भवति। इह अङ्काश्चत्वारो भवन्ति। प्रतिमुखनिर्वहणसन्धी चात्रापेक्षिते भवतः। वत्सराजस्य रुक्मिणीहरणम् अस्योदाहरणम्।

वस्तुतः संस्कृतनाटकस्य सुदीर्घा परम्परा ऋग्वेदकालादारभ्य अद्यावधि अविच्छिन्नरूपेण प्रचलिता वर्तते। तत्र अद्वत्वे नाट्यरचनायां नवीनां पद्धति कुत्रचिद् दृश्यते। तत्रापि पूर्वीयनाट्यपरम्परायां वियोगान्तं न नाटकम् इति सिद्धान्तो नाट्यशास्त्रकारैः बहुशः परिपालितो दृश्यते। परं पाश्चात्यनाट्यसिद्धान्ते तु वियोगान्त–नाट्यरचना अपि समादृता दृश्यते। सुसमृद्धेषु पूर्वीयनाट्यशास्त्रस्य बहुभेदप्रभेदेष्वपि तानि समाश्रित्य रूपककाराणां क्षेत्रेऽस्मिन् लेखनी प्रशस्तरूपेण प्रवृत्ता न दृश्यते। परन्तु आधुनिकानां संस्कृतविदुषां शनैः–शनैः क्षेत्रेऽस्मिन् प्रवृत्तिरवश्यमेव भविष्यतीति विषये सहृदयानां चेतो नितरां विश्वस्तं वर्तते।

सन्दर्भः

1. काव्यादर्शः
2. साहित्यदर्पणम्
3. काव्यप्रकाशः
4. भरतनाट्यम्
5. भरतनाट्यम्